श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र वेदान्तचार्य कृतिषु

# ॥ द्रमिडोपनिषत्सारः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ द्रमिडोपनिषत्सारः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवायोग्योऽतिभोग्यश्शुभसुभगतनुस्सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत्सत्पदव्यां सहायः
श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः॥ १ ॥

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये।
ऐश्वर्यादेश्चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
षड्भिस्स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः॥ २ ॥

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराधं सरसभजनं स्वार्जवगुणम्।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायान्मुनिरधिजगावाद्यशतके॥ ३ ॥

द्विकाभ्यां द्व्यष्टाङ्घ्रिर्दुरधिगमनीतिस्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्वं व्यवृणुत।
तदादौ गाथाभिर्मुनिरधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह सङ्गृह्य कृपया॥ ४ ॥

परत्वाद्यैरित्थं परिचरणसक्तो गुणगणैः
प्रभुं सेवायोग्यं प्रथमशतके वीक्ष्य वरदम्।
तमेव स्वात्यर्थप्रियमथ च भोक्तुं व्यवसितो
वरेण्यत्वं तस्य प्रथमवरणीयं प्रथयति॥ ५ ॥

द्वितीयेऽतिक्लेशक्षणविरहमुत्तुङ्गललितं
मिलत्सर्वास्वादं व्यसनशमनं स्वाप्तिमुदितम्।
स्ववैमुख्यत्रस्तं स्वजनसुहृदं मुक्तिरसदं
स्वकैङ्कर्योद्देश्यं सुभगसविधस्थं निरविशत्॥ ६ ॥

उपायत्वैकान्तं प्रथममिह सेव्यत्वमुदितं
ततश्च प्राप्यत्वौपयिकमतिभोग्यत्वमवदत्।
द्वयं तत्स्वासाधारणतनुविशिष्टस्य गणयन्
तृतीये विश्वेशं शुभसुभगरूपं कथयति॥ ७ ॥

अनीदृक्सौन्दर्यं तनुविहितसर्गादिसुभगं
स्वसेवार्थाकारं प्रगुणवपुषं मोहनतनुम्।
अपश्यल्ल(भ्या)ब्धार्चाविभवमतिदास्यावहतनुं
सदा दृश्यं स्तुत्याकृतिमघविरुद्धाकृतिमिह॥ ८ ॥

श्रियः कान्तोऽनन्तश्शुभतनुविशिष्टः फलमसौ
फलावाप्तेर्हेतुः स्वयमिति च निर्द्धार्य शतकैः।
इदानीं बुद्धिस्थक्रमत इह युक्त्या मुनिवरः
फलत्वं तस्यैव द्रढयति तदन्येषु विमुखः॥ ९ ॥

स्थिरैश्वर्यं तुर्ये सहजबहुभोग्यं निरविशत्
मिथःश्लिष्टं क्लेशावहसहिततुल्यं निजजनम्।
कृतार्थीकुर्वन्तं प्रणयिभिषजं सद्बहुगुणं
स्वहेयस्वोपेक्ष्यं स्वमतफलमुच्चैस्स्ववगतम्॥ १० ॥

उपायत्वं यत्तत्प्रथमशतकेऽभाव्यत विभो-
रनन्योपायस्तद्दृढयति परं पञ्चममुखैः।
निरीहस्तत्रादौ निरवधिकनिर्हेतुकदया-
सरित्स्रोतःपद्मं शरणयति नाथस्य चरणम्॥ ११ ॥

दयानिघ्नं भक्तैरघविमथनं प्रमजनकं
जगद्रक्षादीक्षं स्मृतिजुषमहम्भावविषयम्।

शरण्यं दीनानां स्वरसकृतदास्याभ्युपगमं
  प्रचख्यौ तं प्राप्तं प्रशकनकृतं पञ्चमशते॥ १२ ॥

अनाद्यन्तानन्दस्वरसकरुणा(कन्दजनितः )नन्द इति नः
  प्रणेतुर्व्यापारः प्रपदन(विपाका)पिपासार्ह उदितः।
तमाचार्योपज्ञं चिरवि(रहि)घटितस्वात्मघटन-
  स्फुरच्छक्तिं षष्ठे मुनिरशरणो याति शरणम्॥ १३ ॥

गुरुद्वारोपेयं स्वयमभिमतं वैरघटकं
  चरित्रैः कर्षन्तं परविघटनं स्वान्वितहरम्।
निदानं धृत्यादेर्घटकशभूतिद्वयमगात्
  अनर्हद्वैघट्यं त्वविकलशरण्यस्थितिमिह॥ १४ ॥

तदेवं षष्ठान्तं विहितसविशेषप्रपदनः
  फलालाभात् खिन्नस्त्वरितहृदयस्सप्तमशते।
अनिष्टोपन्यासप्रभृतिभिरनिष्टप्रशमने
  स्वतस्सिध्यच्छीलं प्रभुमभिमुखं संमुख ति॥ १५ ॥

सहन् शाठ्याशङ्कामुपशमितगर्हः प्रकटयन्
  स्वगोप्तृत्वं गुप्तिक्रममखिलजन्तुप्रणयिताम्।
श्रिताक्रन्दच्छेत्तास्मरणविशदश्चित्रविभवः
  तौ युञ्जन् स्तोत्रव्यसनजिददर्शि प्रभुवरः॥ १६ ॥

अथानिष्टान् पुंसां स्वयमुपजिहीर्षन्नपि विभुः
  तदिच्छां बाह्येषु प्रशमयितुकामः क्रमवशात्।
निजेच्छासंसिद्धत्रिविधचिदचिद्वस्तुविततिः
  श्रितेच्छावैचित्रीवश इति वदत्यष्टमशते॥ १७ ॥

दिदृक्षायां दृश्यः प्रभुरगणि निस्सङ्गसुलभः
  स्वविश्लेषैकान्तः श्रुतिविहितपौष्कल्यविभवः।
अपेक्षासापेक्षस्ववितरणसज्ज्ञो हृदि रतः
  स्वदास्यं तन्निष्ठां तदवधिमपीह प्रकटयन्॥ १८ ॥

अभीष्टं विश्वस्मिन् विषमफलकाङ्क्षिण्यविषमम्
    प्रयच्छन्तं दृष्ट्वा परमपुरुषार्थैकरसिकः।
निरस्तान्यापेक्षो निखिलजगदीशस्य नवमे
    निदानं सिद्धीनां निरुपधिसुहृत्वं गणयति॥ १९ ॥

अभाव्येको बन्धुश्चिरकृतदयश्शीलजलधिः
    स्वसंबन्धात् गोप्ता स्वगुणगरिमस्मारणपरः।
अशक्यो विस्मर्तुं घटकमुखविस्रम्भविषयान्
    सुमज्ज्ञानिस्सिद्ध्युन्मुखसमय इच्छन्नवसरम्॥ २० ॥

उदन्तैरित्येवं निरूपधिकसौहार्दपिशुनैः
    उदन्यामुद्वेलामुपजनितवन्तं निजपदे।
त्रिवर्गातिक्रान्तस्थिरनगरघण्टापथगतेः
    सहायीकुर्वाणश्चरमशतके विन्दति मुनिः॥ २१ ॥

गतिं व्यध्वक्लेशच्छिदमपिच शङ्कास्पदरसं
    भजद्भिस्सुप्रापं विविधभजनप्रक्रियमिह।
फले तीव्रोद्योगं स्वविषयकृतात्यादरमगा-
    द्यदृच्छातुष्टं सत्सरणिमपुनर्जन्मसयु(ह)जम्॥ २२ ॥

परं प्राप्यं पश्यन् परिचरणहेतुं विगणयन्
    परिष्कुर्वन्नाज्ञामनितरशरण्यश्शरणयन्।
अनिष्टप्रध्वंसप्रभृतिषु निदानं च कथयन्
    मुहुर्देवं लक्ष्म्या सहितमिह भेजे मुनिवरः॥ २३ ॥

पुरा शोकश्श्लोकोऽभवदिति नयादित्युपनिषत्
    मुनेः पुण्यश्लोकादजनि वरभक्तेः परिणतिः।
व्यपोह्य स्वं भावं हरिचरणसन्तानकलिकां
    अपीक्षद्योगी यस्तनुमतनुकारुण्यविवशः॥ २४ ॥

सतामित्थं सारं द्रमिडनिगमस्यान्वकथयत्
    बहूनां विद्यानां बहुमतिपदं वेङ्कटपतिः।

दिशासौधश्रेणीदृढघटितजैत्रध्वजपटी
परामर्शभ्रश्यत्प्रतिमतनिराबाधनिगमः॥ २५॥

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा-
परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति॥ २६॥

॥ इति द्रमिडोपनिषत्सारः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥